# Tantriki Sandhya

# तान्त्रिकी सन्ध्या

## Document Information

Text title : Tantriki Sandhya

File name : tAntrikIsandhyA.itx

Category : vishhnu, dashAvatAra, viShNu

Location : doc_vishhnu

Proofread by : Manoj Kumar Barman

Description/comments : nRRisiMhakosha 3 upAsanA khaNDa uttarArdha

Latest update : August 11, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 11, 2025

*sanskritdocuments.org*

Tantriki Sandhya

# तान्त्रिकी सन्ध्या

श्रीगणेशाय नमः ॥ वैदिकीसन्ध्यां कृत्वा तान्त्रिकीमारभेत् । यथामूलेनाचम्य मूलेन शिखां बध्वा । गुर्वादिवन्दनपूर्वकं प्राणायाममत्रयं कृत्वा ऋष्यादिकरषडङ्गं कृत्वा सूर्यमण्डले यथोवक्तश्री लक्ष्मीनृसिंहमूर्तिं ध्यात्वा ॥ स्वपुरतः पात्रान्तरे जलमापूर्य ॥ ब्रह्माण्डोदरतीर्थें तीर्थानि करैः स्पृष्ट्वाग्निनेरवे तेन स्तयेन सकले इह तीर्थे प्रयच्छ मे ॥ इति प्रार्थ्य ॥ गङ्गेचेतिमन्त्रेण क्रोमिति अङ्कुशमुद्रया सूर्यमण्डला तीर्थान्यावाह्य तज्जललवं इति अमृतबीजेन धेनुमुद्रयामृतीकृत्य मूलेनत्रिः अभिमन्त्र्य तत्प्रवक्ष्यमाणो श्री लक्ष्मीनृसिंह मूर्तिमावाह्य गन्धादिभिः सम्पूज्य पूर्ववदाचम्य श्रीलक्ष्मी नृसिंहप्रीत्यर्थं प्रातः सन्ध्यां करिष्ये ॥ इति सङ्कल्प्य तज्जलं वामहस्ते गृहीत्वा दक्षिणाङ्गुष्ठानामिकाभ्यां तेन मूलेन स्पृष्टा मूलं जप्त्वा दिशतादिग्भिः मातृकाभिः आत्मानं प्रोक्ष्य अवभूः । शतं पुनर्दक्षिणहस्ते गृहीत्वा ईड्यातः समाकृष्यत् । धौतपापसचयं कृष्णवर्णपिङ्गलया विरेच्य पुरः कल्पितवज्रशिलायां फडिति पूर्ववदास्फाल्य ॥ पुनः पूर्ववदाचम्य अञ्जलिना तज्जलमापूर्य सूर्याय अर्घ्यं दद्यात् ॥ यथा ॥ ह्रीं हंसः श्री सूर्य एवोर्घ्यः स्वाहेति त्रिः अर्घ्यं दत्वा ॥ मूलेनैव श्रीलक्ष्मीनृसिंहं तर्पयामीति त्रिः सन्तर्प्यः ॥ यथा ॥ श्री नृसिंहोऽहमस्मि परितः उदकं क्षिपेत् ॥ यथोक्तं श्री लक्ष्मीनृसिंहं ध्यात्वा यथाशक्त्या । गायत्री मूलं प्रजप्य वक्ष्यमाणमन्त्रेण जपत्रिवेद्यः ॥ श्री लक्ष्मीनृसिंह ध्यायन् प्रणमेत् ॥ गायत्री यथा ॥ वज्रनखायं विद्महे तीक्ष्णदंष्ट्राय धीमहि । तन्नो नारसिंहः प्रचोदयात् ॥ इति मूलं प्रजप्य तद्दशांशं तर्पयेत् इति प्रातः सन्ध्याविधिः ॥ एवमेवाशिष्टं सन्ध्याद्वयं कार्यम् ॥ उ हौ तत् तत्कालसन्ध्यां करिष्ये इति सङ्कल्प्य अन्य सर्वं समानम् ॥ सन्ध्या त्रयावश्यकत्वात् ॥ गृहीतजलपात्रः स्तोत्रादिकं पठित्वा ॥ पूजास्थानं आगत्य प्रक्षालितपादश्चाचान्तः पूजागृहद्वारि स्थित्वा ॥ ॐ सूर्यः सोमो यमः कालोमहाभूतानि पञ्च च ॥ एते शुभाशुभस्येह कर्मणो नवसाक्षिण इति पठित्वा ॥

इति तान्त्रिकी सन्ध्या पाठः ॥

This is just a descriptive information rather than a procedure to do sandhyA vandanam .

Proofread by Manoj Kumar Barman

*Tantriki Sandhya*

pdf was typeset on August 11, 2025

Please send corrections to *sanskrit@cheerful.com*